International Journal of Sanskrit Research 2022; 8(2): 21-22

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 21-22
© 2022 IJSR
www.anantaajournal.com
Received: 06-01-2022
Accepted: 19-02-2022

**Hem Chand**
Research Scholar, Department of Architecture, Shri Lal Bahadur Shastri National Sanskrit University, Katwaria Sarai, New Delhi, India

**Corresponding Author:**
**Hem Chand**
Research Scholar, Department of Architecture, Shri Lal Bahadur Shastri National Sanskrit University, Katwaria Sarai, New Delhi, India

# वृक्षाणां दिगनुगुणं विचारः

**Hem Chand**

**प्रस्तावना**

वृक्षाः प्रकृतेः प्राणभूताः भवन्ति । इदमप्येकम् महत्त्वपूर्णं कारणमस्ति यत् भारतीयाः पुराकालादेव वृक्षेषु देवानां भावः स्वीकुर्वन्ति। वृक्षाः प्रकृतेः महत्वपूर्णानां तत्त्वानां रूपे भवन्ति । प्रकृतिः सर्वेषां प्राणिनां संरक्षणाय यतते । इयं सर्वान् विविधैः सुखासाधनैः पुष्णाति । पृथिवी, जलम्, तेजः, वायुः, आकाशश्चास्याः प्रमुखानि तत्त्वानि । तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणम् रचयन्ति । आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम् । वृक्षाः न केवलम् अस्मभ्यं शुद्धवायुमेव यच्छन्ति अपितु ते पत्राणि पुष्पाणि फलानि काष्ठानि औषधीन् छायां च वितरन्ति । अस्माद् हेतोः अस्माकं कर्त्तव्यम् अस्ति यत् वयं वृक्षारोपणम् तेषां संरक्षणं, उद्यानतडागादीनां निर्माणं संरक्षणं शुचितापूर्वकं पर्यावरणसंरक्षणार्थं प्रयत्नं कुर्याम । यदि पर्यावरणम् संरक्षितम् न स्यात्तदा उल्कापातैः, जलप्लावनैः, भूकम्पैः वात्याचक्रैः, अग्निभयादिभिः प्रकृतिकोपैः जनः आतङ्कितः भवति । यथा अजातशिशुः मातृगर्भे सुरक्षितः तिष्ठति तथैव मानवोऽपि प्रकृतिगर्भे सुरक्षितः भवति । पादपाः मनुष्याणां हितैषिणः निस्वार्थसहायकाः च सुहृदः भवन्ति । आयुर्वेदशास्त्रे वृक्षाणां महत्वविषये अत्यन्तं विशदं वर्णनं समुलभ्यते । वृक्षाणां विना तु कतिपयेषाम् प्राणिनां जीवनमप्यसंभवम् । वृक्षैरावृताः नगाः, फलपुष्पै : नताः वृक्षाः, उद्यानानि वाटिकाश्च रमणीयत्वमुपयान्ति । पुराकाले मङ्गलाशंसिनः ऋषयः वने तेनैव कारणेन निवसन्ति स्म यतोहि तत्रत्यं पर्यावरणम् अतीवमनोहरं भवति । वृक्षाः स्वकीयायां भोजनप्रक्रियायां वातावरणात् कार्बन डाई आक्साइड ($CO_2$) गृहीत्वा आक्सीजन $O_2$ च ददति । येन सर्वेषां जीवानां जीवनम् अस्यां धरायां सम्भवति । वृक्षेभ्यः वयं वायु, काष्ठानि, तृणानि, खाद्यवस्तूनि, तथा चान्यानि अपि अनेकानि वस्तूनि प्राप्नुमः । वृक्षाः पर्यावरणम् शोधयन्ति तथा च मृदापरदनवारणे सहायकाः भवन्ति । पुराणेषु वास्तुग्रन्थेषु च वृक्षारोपणविषयकं वृक्षविज्ञानविषयकञ्च ज्ञानं प्राचुर्येणास्ति । तत्र एतदपि वर्णितमस्ति यत् कस्यां दिशि कीदृशाः वृक्षाः गृहस्य समीपे च स्युः । पुराणेषु त्रिविधं वर्णनं आधिक्येन प्राप्यते -

1. गृहसमीपे ग्राह्यवृक्षाः ।
2. गृहसमीपे निन्द्यवृक्षाः ।
3. वृक्षायुर्वेदः।

**1. गृहसमीपे ग्राह्यवृक्षा**

वृक्षाणां प्रयोजनं कथयितुं वृहत्संहितायां वर्णनमस्ति यत् वृक्षलतागुल्मादिभिर्विना तु जलाशयोऽपि न शोभते। अतो जलाशयानां राजमार्गाणां च समीपे वृक्षाणां रोपणं अवश्यमेव कर्त्तव्यम्।

> प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः ।
> यस्मादतो जलाप्रान्तेश्वारामान् विनिवेशयेत् ।। [1]

सर्वप्रथमं भूमेः ऊर्वरतायाः परीक्षणमपि अत्यावश्यकं भवति यतोहि शुष्का भूमिः पाषाणी वा स्यात् तदा तत्र वृक्षाणां संरक्षणं अति दुष्करं भवति । अस्मिन् विषये शास्त्रेषु अपि वर्णनमस्ति यत् इष्टिकापाषाणादिरहिता मृद्वी भूमिः सकलविधावृक्षाणां रोपणाय सर्वोपयुक्ता भवति । तत्र च सर्वमाद्यं तिलानां रोपणम् कर्त्तव्यम् । यदा पुष्पाणां विकासो भवेत् तदा तत्रैव तेषां मर्दनं कृत्वा मृतिकया सह मेलयेत् । अयमेव भूमेः आदिमः संस्कारः । [2]

प्रथमं तावदरिष्टशोकपुन्नागशिरीषप्रियङ्गूनां वृक्षाणां गृहं निकषा आरामे वा रोपयेत् । [3]

मत्स्यपुराणे वर्णनं प्राप्यते यत् पूर्वस्यां दिशि वटवृक्षस्य आरोपणम् सर्वविधत्वेन शुभदं भवति । याम्यां दिशि उदुम्बरः वारुण्यां च अश्वत्थवृक्षौ शुभदौ भवतः ।

अथ चोत्तरस्यां दिशि प्लक्षवृक्षः शुभदो भवति । अमीषां सर्वेषां पादपानां विपरीत्वेन विपरीतं फलं दरीदृश्यते । दुग्धकण्टकवृक्षाणां रोपणं गेहं निकषा शुभदं न भवति यदि ते फलिनोऽपि स्यात्तदापि त्याज्याः । कदलीजातीचम्पकपाटलकेतकीनां रोपणं शुभदं भवति । सुवर्वर्णीयपुष्पाणि अपि शुभदानि न भवन्ति । [4]
राजवल्लभवास्तुशास्त्रे अपि मतस्यास्य सम्मतिरस्ति । तद्यथा -

वृक्षा दुग्धसकण्टकाश्च फलिनस्त्याज्या गृहाद्दूरतः
शस्ते चम्पकपाटले च कदली जाती तथा केतकी ।
यामादूर्ध्वमशेषवृक्षजनिता छाया न शस्ता गृहे
पार्श्वे कस्य हरे रवीशपुरतो जैनानु चण्ड्याः क्वचित् ।। [5]

मत्स्यपुराणे यथोक्तं तथैव बृहत्संहितायामप्युक्तं दिशानुगुणम् वराहमिहिरः कथयति यत् प्लक्ष - वट - उदुम्बर- अश्वत्थानां चतुर्णां वृक्षाणां रोपणं प्रदक्षिणाक्रमेण अर्थात् दक्षिणादिषु दिक्षु अशुभाः, उत्तरादिषु च शुभदं भवति ।

यामादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते ।
उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः ।। [6]

वास्तुराजवल्लभे गृहं निकषा द्राक्षा- पुष्पयुतविल्ववृक्ष - चन्दन - अश्वत्थ - दाडिमप्रभृतीनां वृक्षाणां रोपणं कर्त्तव्यम् । एतच्छुभम् भवति । तस्य प्रमाणं अत्र प्रस्तूयते -

द्राक्षापुष्पकमण्डपं च तिलकान् कृष्णां वपेद्दाडिमीम् ।
सौम्यादेः शुभदौ कपीतनवटावौदुंबराश्वत्थकौ ।। [7]

वास्तुसौख्यं वास्तुमण्डनादिषु ग्रन्थेश्वपि वृक्षारोपणविचारः विहितः ।

### 2. निन्द्यवृक्षाः
वास्तुग्रन्थेषु शुभावृक्षाणां वर्णनवदेव अशुभवृक्षाणां अपि वर्णनं प्राप्यते । मत्स्यपुराणे कथितमस्ति यत् गृहसमीपे कण्टकयुतवृक्षदुग्धवृक्षाणां विषये फलकथनमपि कृतम् तच्च एवं स्त्रीहानिप्रदाः संततिहानिप्रदाः भवन्ति इमे वृक्षाः । तत्र एवमपि उक्तमस्ति यत् यदि गृहस्य समीपे एतादृशाः वृक्षाः स्युस्तदा तत्र शुभवृक्षाणां कर्त्तव्यम् येन अशुभतायाः निरासोऽपि भविष्यति अथ च सौन्दर्यमपि वर्धते । [8]
नारदपुराणे कथितमस्ति यत् प्लक्ष - उदुम्बर - अरिष्ट - कण्टकवृक्ष - अश्वत्थ - कपित्थ - अगस्त्य - सिन्धुवारराः निन्दिताः भवन्ति गृहं निकषा । विशेषतः दक्षिणभागे पश्चिमे च हानिकराः भवन्ति । वास्तुसौख्ये उक्तम् यत् दक्षिणस्यां दिशि प्लक्षवृक्षः रोगप्रदः भवति । पश्चिमदिशि वटवृक्षः कुलकलत्रहानिकरो भवति । उत्तरस्यां दिशि उदुम्बरः ह्रासकरो भवति । [9]
समराङ्गणूत्रधारे अपि कथितम् यथा -

नेष्टाः कण्टकिनः स्वादुफलानि क्षीरद्रुमाश्च ये ।
सुगन्धयश्च ये तद्वद् ध्रुवं तेषु पशुक्षयः ।। [10]

अग्निपुराणे वर्णनमस्ति यत् गृहस्य उत्तरतः प्लक्ष : पूर्वस्यां दिशि वटः, दक्षिणस्यां दिशि आम्रः पश्चिमायां च अश्वत्थः शुभः भवति । गृहस्य समीपे दक्षिणस्यां दिशि उत्पन्नाः कण्टकिनो वृक्षाः अपि शुभाः भवन्ति। [11]
विश्वकर्मप्रकाशे कथितमस्ति यत् पूर्वस्यां दिशि फलिनो वृक्षाः रोपणीयाः । दक्षिणदिशि च दुग्धावृक्षाः रोपणीया : । पश्चिमदिशि च पद्मोत्पलभूषिताः वृक्षाः शुभदाः भवन्ति ।

पूर्वे फलिताः वृक्षाः क्षीरवृक्षाश्च दक्षिणे ।
पश्चिमेन जलं श्रेष्ठं पद्मोत्पलभूषितम् ।। [12]

### निष्कर्ष
निष्कर्षत्वेन वयं एवं कथयितुं शक्नुमः यत् गृहं निकषा कण्टकिनो दुग्धवृक्षाः च न भवेयुः । तथा च येषां वृक्षाणां कृते दिशः निर्धारणं कृतमस्माकम् पूर्वाचार्यैः तेषां वृक्षाणां रोपणं दिगनुगुणमेव भवितव्यम् । यतोहि वृक्षाः पर्यावरणस्य प्राणभूताः सन्ति । अथ च अस्मभ्यमपि प्राणभूता एव । यदि वृक्षाणां कर्तनम् एवमेव भविष्यति यथा भवति अद्यत्वे मैट्रोमार्गनिर्माणाय तथा च बहुभूमिकभवानानां निर्माणाय च यदिदं चाकचिक्यजाले वयं प्रायः वृक्षाणां महत्त्वविषये जागरणं न करिष्यामः तदा इदं अस्मभ्यं शुभदं न भविष्यति । अत एवोक्तम्

प्रकृतिरक्षया एव जीवनरक्षेति ।

### संदर्भ

1. बृहत् संहिता अध्याय 55 श्लो 1
2. बृहद्वास्तुमाला वृक्षायुर्वेदाध्यायः श्लो. 2 पृ. सं . 153
3. बृहत् संहिता अध्याय 55
4. मत्स्यपुराणम् अध्यायः 255 श्लो 20-24
5. राजवल्लभ
6. बृहत्संहिता अध्यायः 53 श्लो सं . 85
7. राजवल्लवास्तुशास्त्रम् अध्यायः 1 श्लो सं 28
8. मत्स्यपुराणम् अध्यायः 255 श्लो सं 21-22
9. वास्तुसौख्यम् तृ. श्लो 37-39
10. समराङ्गणसूत्रधार अध्याय : 15
11. अग्निपुराणम् अध्यायः 282 श्लो 1-4
12. वि. प्रकाश अध्यायः 7 श्लो 106